श्री स्वामिनारायणो विजयतेतराम् ॥

Chapter-3

# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## तृतीयोऽध्यायः

( इश्वरनिरूपणात्मकः )

# श्रीस्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## अथ तृतीयोऽध्यायः

## ३.१ ''ईश्वरनिरूपणम्''

श्री स्वामिनारायणाभिमतेषु चेतनतत्त्वेषु जीवतत्त्वस्य निरूपणान्तरं ईश्वरतत्त्वं निरूप्यते। ईश्वरपदवाच्यविषये दार्शनिकानां विप्रतिपत्तिर्वर्तते। श्री स्वामिनाराणयणीयदार्शनिक व्यतिरिक्ताः सर्व आस्तिकाः दार्शनिकाः सर्वोत्कृष्ट सत्तामेव ईश्वरशब्देनाभिदधते। ते सर्वे ब्रह्म-परब्रह्म ईश्वरः परमात्मा-परंपुरुषः पुरुषोत्तमः इत्यादिकाः शब्दाः समानार्थका इति प्राहुः। परन्तु स्वामिनारायण दर्शनानुसारेण ईश्वरब्रह्माणौ जीवपरंब्रह्माभ्यां भिद्येते। तदनुसारेणैवात्र ईश्वरतत्त्वं निरूप्यते।

### ईश्वरशब्दस्य व्युत्पतिः

ईश् नियमने धातोः ईश ऐश्वर्ये धातोश्चौणादिके वरचि प्रत्यये कृते सति ईश्वरशब्दस्य द्वावर्थौ भवतः; नियामक ऐश्वर्यसम्पन्नश्च। एतस्मादेव कारणात् तेषां-तेषां लोकानां नियामकः तेषां तेषां लोकानामैश्वर्यैः सम्पनाश्चेतना एवात्र ईश्वरशब्देनाभिधीयन्ते। इमाः चेतनाः ब्रह्माण्डान्तर्वर्तिनः, हिरण्मय कोशान्तर्गताः प्रकृतिलयविराट्सूत्रात्मा अव्याकृत-महाकारणेषु-अन्यतमेऽन्तर्गताः मुक्तजीवब्रह्मभ्यां भिन्नाश्च सन्तीति श्रीकृष्णवल्लभाचार्यः[१]। यद्यपीमे समे ईश्वराः सन्ति किन्तु स्वाभाविकं नित्यं चेश्वरत्वं परब्रह्मण एव तद्व्यतिरिक्तानामीश्वराणां त्वनित्यमौपाधिकमीश्वरत्वमिति तत्त्वम्। यथा भगवत्साधर्म्यापन्नास्तद्गुणलेशमात्र -त्वेन भगवच्छब्दैरभिधीयते, तद्वदीश्वरवदैश्वर्यातत्वादीश्वरशब्दवाच्यत्वम्। अत एव प्रकरणेऽस्मिन् ईश्वरशब्देन परब्रह्मातिरिक्तानामेव वाच्यत्वं ज्ञेयम्।

सत्सङ्गि जीवनेऽप्यभिहितम्-

**देहत्रये विराडादौ व्याप्योत्पत्तिस्थितिक्षयान्।**
**करोति जगतां यस्तु सर्वज्ञो ज्ञेय ईश्वरः**[२]॥ इति।

सर्वज्ञ इत्यस्य बहुज्ञः एवार्थः न तु सकलानां पदार्थानां ज्ञाता। ईश्वरा अनेके सन्ति। त इमे समे अष्टावरणादिहिरण्मयकोशान्तःस्थानवासिनो भवन्ति। एतेषु समेष्वीश्वरेषु हिरण्यमयकोशान्तर्गतो महाविष्णुरेव स्वभावतो नित्य ईश्वरः तद्व्यतिरिक्ताः अष्टावरणवासिन ईश्वराः उपाधिवशादेवेश्वरत्वंगताः अत एव परब्रह्मापेक्षयानित्याश्चते सन्तीति, साम्प्रदायिको विवेकः।

---

१-श्री स्वा. वेदान्तसारः पृ. १८

२-सत्सङ्गिजीवनम् श्री स्वामिनारायणवेदान्तसार पृ. १८ उद्धृतम्

## ३.२ प्रकृतिलयविदेहानां मोक्षस्थानम् ।

## ( ईश्वराणां निवासस्थान निरूपणम् )

चतुर्दशभुवनात्मकाण्डकटाहाऽन्वितस्य ब्रह्माण्डस्य परितः प्रथममावरणं पृथिव्यात्मकं तच्च पञ्चाशत् कोटियोजनात्मक ब्रह्माण्डपरिमाणाद् दशगुणं पञ्चवृन्दयोजनायामं विद्यते । तच्चावरणं शब्द–स्पर्श–रस–गन्धात्मकं भवति ।

तदुपरि द्वितीयमावरणं जलस्य विद्यते । इदं प्रथमावरणाद् दशगुणं, पञ्चखर्वयोजनायामं तदुपरि द्वितीयमावरणं शब्दस्पर्शरूपरसयुक्तं विद्यते । तदुपरि तृतीयमावरणं तेजसो विद्यते । इदञ्च द्वितीयादावरणाद् दशगुणं पञ्चतिखर्वं योजनायामं स्पर्शरूपगुणयुक्तं वर्तते । तस्योपरि वायोरावरणं चतुर्थं विद्यते । इदमपि तेजस आवरणाद् दशगुणं पञ्चशंख योजनायामं, शब्दस्पर्शगुणयुक्तं चास्ति । तस्योपरि आकाशस्यावरणं विद्यते, वायोरावरणाद् दशगुणं पञ्चपद्मयोजनायामं शब्दगुणयुक्तं विद्यते । तस्योपरि अहंकारस्य आवरणं विद्यते । आकशावरणस्य दशगुणं पञ्चसागर योजनायामं अभिमानगुणयुक्तं चास्ति । तस्योपरी महत् तत्त्वस्यावरणं विद्यते । इदमपि अहंकारावरणात् दशगुणं पञ्चान्त्य योजनायामं अध्यवसायगुणयुक्तं चास्ति । तस्योपरि अष्टमावरणं प्रकृतितत्त्वस्य विद्यते । सप्तमावरणाद् दशगुणं पञ्चमध्ययोजानायामं, त्रिगुणात्मकं निबिडधूमवर्णं चास्ति ।

एवमेतेष्वष्टसंख्याकेषु आवरणेषु प्रकृतिलयंगताः चेतनाः निवसन्ति – विदेहाश्चापि निवसन्ति इति केचित् । केचित्तु प्रकृतिलंयगता एव चेतना ईश्वरशब्देनाभिधीयन्ते ।

अत्रायं स्वाभाविकोऽनुयोग :उदेति यत्, के प्रकृतिलयंगता भवन्तीति ।

अत श्रीकृष्णवल्लभाचार्याः प्राहुः–ये पृथ्वी–जल–तेजो–वायु–गगनात्मकमिदं शरीरमेवाऽऽत्मानभिमन्यमानाः चार्वाकाः मरणानन्तरं पृथिव्यादि पञ्चावरणेषु लयं गच्छन्ति । शब्द–स्पर्श रूप रस–गन्धात्मक–पञ्चतन्मात्राण्यात्मत्वेनाभिमन्यमानाः प्राणापानसमान–व्यानोदानादिवायून् आत्मत्वेनाभिमन्यमानाश्च नास्तिका अपि एवमेव लयं यान्ति । श्रोत्र–त्वक्–चक्षुरसना–घ्राण–वाक्–पाणि–पाद–पायूपस्थात्मकानीन्द्रियाण्यात्मत्वेनाभिमन्यमाना अपि नास्तिकाः तत्रैव लयं यान्ति । मन एवात्मेति मन्तारोऽहंकारक्षणिकां बुद्धिं चात्मानमभिमन्यमानमभिमत्य तदुपासकाः क्षणिकात्मवादिनश्चाहंकारात्मके आवरणे लयं गच्छन्ति । ते सर्वे तत्र तत्र प्रकृतिलयात्मिकां सान्तां मुक्तिं प्राप्ता ईश्वरा इत्युच्यन्ते' । इति । अत्रेमे भवन्ति संग्रहश्लोका :

**दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः ।**

**भौतिकास्तु, शतं पूर्णं सहस्त्रन्त्वाभिमानिकाः ।**
**बौद्धा दश सहस्त्राणि तिष्ठन्ति विगतज्वराः ।**
**पूर्णं शतसहस्त्रंहि तिष्ठन्त्यव्यक्तचिन्तकाः ।**
**पुरुषं तत्परं प्राप्य कालसंख्या न विद्यते**[१]

इत्थं प्रकृतिलयात्मकेषु अष्टावरणेषु ये लीनाः लिङ्गदेहेन साकंगतास्ते प्रकृतिलयाः चेतनाः सन्तिः ।

## ३.३ ईश्वरलक्षणम्

ईशीतुं शीलमस्येति' ईश्वरः । लक्ष्यतेऽनेनेति लक्षणम् । ईश्वरस्य लक्षणमीश्वर लक्षणम् । ईश्वरत्वं नाम "**जीवभिन्नत्वे सति हिरण्यमय कोषान्तर्गतचेतनत्वम्, ब्रह्माण्डानन्तर्गतत्त्वे सति हिरण्यमयकोशान्तर्गत चेतनत्त्वम्, प्रकृतिलय-विराट्-सूत्रात्माऽव्याकृत-महाकारणाऽन्यतमाऽन्तर्गतचेतनत्वम्, जीवमुक्तब्रह्मभिन्नत्वे सति नियाम्यचेतनत्वं वेत्यादि लक्षणान्यवगन्तव्यानि**[२]। " श्रीब्रह्मरसायनभाष्यस्य प्रथमखण्डेऽप्युक्तम्-"**ईश्वरस्वरूप किमात्मकम् ? सच्चिादनंदौज आत्मकम्**[३]। इति ईश्वरस्य स्वरूपतटस्थलक्षणे चोक्ते । किञ्चान्यत्राप्युक्तम्-

'**अत एव प्रवाहगतब्रह्माण्डानां प्रवाहस्याऽनादित्वेन तद्रक्षक-संहारकेश्वराणामप्यनादित्वम्**[४]।। इति

ईश्वरं लक्षयता आध्यात्मिकतत्त्वाख्यानं ग्रन्थकर्त्रोक्तं -

**समष्टिदेहयोगश्च तथा सर्गादिकर्तृता ।**
**लयेऽक्षरे च सम्पत्तिर्मतमीश्वरलक्षणम्**[५]।।

अन्वयव्यतिरेकेणेश्वरलक्षणान्यवगन्तव्यानि । अन्वयव्यतिरेकलक्षणञ्चानुपदं व्याख्यास्ये । **विराडादिदेहत्रयव्यापकत्वे सति ब्रह्माण्डादि जगत्सञ्चालकत्वे सति बहुज्ञत्वम्,** (जीवापेक्षया बहुज्ञत्वं बोध्यम्) **तत्त्वाभिमानिदैवतसामर्थ्य शालित्वमीश्वरत्वम्**[६]। इत्यनेन प्रकारेण रसायनकार ईश्वरस्य तटस्थ लक्षणमाह।

ईश्वरस्य श्रीस्वामिनारायणदर्शनानुसारेण स्वरूपलक्षणं तु-

"**यत्रौजस्त्वं तत्रेश्वरत्वं, यत्र विराट्पिण्डे शरीरत्वं तत्राऽवच्छेद कतासंसर्गेण स्वीयैश्वर्यवत्त्वम्, यत्रेन्द्रियत्वं तत्र जनकतासंसर्गेण स्वीयैश्वर्यत्वं, यत्र सूत्रात्माद्यन्तःकरणत्वं तत्र स्वीयसंयुक्ततासंसर्गेण स्वीयैश्वर्यत्वं, यत्रैश्वर्यवत्वं तत्र स्वीयतादात्म्येनैश्वर्यत्वमिति अन्वयात्मिक-**

---

१-श्री स्वा. वेदान्तसारः पृ. १८-१९
२-श्री स्वा. वेदान्तसार. पृ. १८
३-ब्रह्मरसायनभाष्यम् खण्ड १.
४-ब्रह्मरसायनभाष्यम् खण्ड १. पृ. ९४
५-आध्यात्मिकतत्त्वाख्यानम् २०/७६
६-ब्रह्मरसायनभाष्यम् खण्ड १. पृ. ८९




**भगवता श्री स्वामिनारायणेन भाषावचनामृते**
**ग.प्र. १३,४१,४६,५१,६३ संख्याकेषु वचनामृतेषु**
**प्रतिपादितम् अष्टावरणचित्रम्**

**व्यापकता । एवं व्यतिरेकित्वं-व्यतिरेकयोः सम्बन्धवत्त्वं, यत्रैश्वर्यवत्वाऽभावः पाषाणे जडे वा सर्वत्र तत्रेश्वरात्मत्वाभावः, इत्यभावयोः समानाधिकरण्यं, यद्वा स्वरूपे व्यतिरेकिता-यदैश्वर्यं स ईश्वरः, यदोजः स ईश्वरः, यन्नौजः स नेश्वरो यथा पाषाणः [१]।'**

**ब्रह्मशक्त्याधीनशक्त्याधायकैश्वर्यवत्वमीश्वरत्त्वम्[२] ।**

अथवा व्यतिरेकः पृथक्स्वतन्त्रस्थितिः- ईश्वरतादात्म्येनश्वरे तत्र विराट्पिण्डादिभेद इति व्यतिरेकेणापि विराडाद् भिन्नता ज्ञायते तेनेश्वरे "विराट्पिण्डादि ईश्वर' इतिभ्रान्तिनाशात् ।

"ईश्वरस्वरूपं किमात्मकम् ?, सच्चिदानन्दौज आत्मकम्, ओजांसि ऐश्वर्याणि, विलक्षाणि सृष्टिसञ्चालकबलानि, वृक्षमूलीयस्तम्बग्रन्थोत्वगन्तर्दण्डनाडिकाशाखापत्रांऽकेरपुष्पकोशफलबीजानुपोषकरसतत्त्वानां विभिन्नपाकानुकूलानि बलानि सामर्थ्यात्मकानि वर्तन्ते यथा तथा ब्रह्माण्डादिसृष्टि सकलसञ्चालनसंभालनसंवाहनपरिवर्तनाद्यैश्वर्यात्मकौजांसि यानि यान्यपि चेतनानि सन्ति आनन्दितानि तानि ईश्वरतत्त्वानीति वैराजादिप्रधानपुरुषपर्यन्तानि सुमूर्तैश्वर्याणि भिन्नतत्त्वानि प्रवर्तन्तेऽवान्तरसृष्टिनियामकानि, सृष्टित्वसामाना- धिकरण्येन नियामकानीति । ब्रह्मशक्त्याधानजीवशक्त्याधायकैश्वर्यवत्त्वम् ईश्वरत्वम्, धर्मधर्मिभावस्तूपचारमात्रम्, चेतने चैतन्यवदीश्वरे ऐश्वर्याणामपि धर्मभूत द्रव्यतया स्थितेस्तथोपचारात्, यथा ज्ञानं ज्ञाता च जीवात्मा ज्ञानघनः, तथा ऐश्वर्यमीश्वरात्मा चैश्वर्यघन ओजोघन इति । ईश्वरा अणुरूपा अपि सुमूर्त परब्रह्मव्याप्यब्रह्म मूर्त्यनुमूर्तिका ऐश्वर्यप्रभावचमत्कृतिप्रसारका ब्रह्माण्डादित्त्वानां स्वेषु सूक्ष्म रूपतयाऽऽकर्षका आधारकाः साक्षात्कारानुकृति चित्त्वसत्त्वानन्दत्वानुस्यूतचमत्कृतिरूपा ऐश्वर्यान्तरिताऽसंख्याऽसीमशक्तिमन्तो जीवात्मत्त्वभिन्नाः सुशुद्धान्तःकरणादिव्याप्ता मायायामुत्तमसृष्टेर्निमायकाः सर्जकाः स्थापकाः संहाकाराश्चेति[३] ।"

ईश्वराः निर्गुणसगुणैश्वर्यशालिनः । **'तमीश्वराणां परमं महेश्वरम्[४],'** प्रधानपुरुषेश्वराः' 'प्रकृतिलयाः सर्वे ' 'यस्य भासा ' आभिः श्रुतिभिः दर्शनेऽस्मिन् प्रतिपाद्यस्य ईश्वरतत्त्वस्यैव वर्णनं क्रियते। सर्वे ईश्वरा इत्युच्यन्ते' ईशः स्वामिनि' 'ईश ऐश्वर्ये', 'स्वामी त्वीश्वरः पतिरीशिता' इत्यादयः ब्रह्माण्ड नियामकनामभिधानं करोति । अस्येश्वरतत्त्वस्य विषये पण्डित श्री कृष्णवल्लभाचार्यो

---

१-ब्रह्मरसायनभाष्यम् खण्ड पृ. ८९
२-ब्रह्मरसायनभाष्यम् खण्ड १. पृ.८८
३-ब्रह्मरसायनभाष्यम् खण्ड १.पृ.८७
४- श्वेताश्वतरोपनिषत् ६/७

वदति- यथा ब्रह्म-'ब्रह्मज्योति सनातनम् ऐश्वर्यौजधना ईश्वराः,विराडादिदेहत्रय व्यापकत्वे सति ब्रह्मण्डादिजगत् कारणत्वे सति बहुज्ञत्वम् तत्त्वाभिमानिदैवत सामर्थ्यशालित्वम् ईश्वरत्वम् विषमावस्थावत्त्वं जगदंकुरहेतुत्वं महत्त्वादिकार्यात्म कत्वं शान्तघोरमूढत्वं प्रकाशप्रवृत्तिनियमवत्त्वं जडचेतनग्रन्थिरूपत्वं सृष्टिस्वरूपत्वं वा मायात्वम्। विशेषस्तत्रैव दृष्टव्यम्

**अथेश्वरस्वरूपं तु द्रव्यमोजः प्रतापिता ।**
**प्रभावः परमैश्वर्ये शाश्वतं तत्त्वमेव तत् ॥**
**प्रकाशवत् प्रभावोऽयं ओज आनन्दवत् स्वयम् ।**
**ज्ञानवान्नित्य एवाऽस्ति स्वतन्त्रश्चाभिभावकः ॥**
**पराभवकरश्चाऽयं तत्त्वात्मा त्वीश्वरः स च ।**
**प्रभावा ईश्वराः सर्व ओजांसि चेतनात्मकाः ॥**
**विराडादौ वपुष्येते प्रसरन्ति द्रवात्मकाः ।**
**द्रविणो द्रव्यरूपास्ते सामर्थ्यज्ञानसंश्रयाः ॥**
**परप्रकाशसंकाशाः सृष्टिशक्तिप्रपूरिताः ।**
**मायाण्डगोलकानां तु व्यवस्थास्थापका हि ते ॥**
**भूतभौतिकसृष्टीनां दर्शिनो दिव्यमूर्तयः ।**
**महामायाप्रभोक्तारो महासृष्टिनियामकाः ॥**
**बहुज्ञाश्च बहुप्रकाशान्विता बहुवृत्तयः ।**
**बहूद्यमाश्च सृष्ट्यण्डानां नियामकशक्तयः ॥**
**साञ्चालका भवन्त्येते त्वोजोमात्रस्वरूपिणः ।**
**ऐश्वर्याणि सुमूर्तानीश्वरा अनन्तसंख्यकाः ॥**
**ओजस्त्वं चेश्वरत्वं वा संप्रवृत्तिनिमित्तकम् ।**
**विराडादीश्वरा यावन्महामायान्तरस्थिताः** [१]**॥**

अथ-ईश्वरात्मत्वम् अविद्यावच्छिन्नसगुणब्रह्मत्वम्, मायाऽऽवृत्तब्रह्मत्वम्, जगजन्मादिनिमित्तकशाश्वतचेतनत्वम्, मायेशत्वम्, शुद्धसत्त्वावच्छिन्नचेतनत्वम्, सृष्टिसमनियतसंचालकचेतनत्वम्, मूलाविद्यावच्छिन्नचेतनत्वम्, आविद्यकतत्त्वपिण्डाधिष्ठितचेतनत्वम्, मायिकवैषम्यापादकचेतनत्वम्, सृष्टिमात्रव्यापकपुरुषत्वम्, प्रकृतिविकृतिमात्रशरीरित्वम्, जगदंकुरोत्पादक-चेतनत्वम्, विराट्सूत्रात्माऽ-व्याकृतमहाकारणान्यतमशरीरित्वम्,हिरण्य -
गर्भादिपदवाच्यचेतनत्वम्, मायागर्भव्यापकसत्त्वांशत्वम्,

---

१-पञ्चतत्त्वनिर्णय पृ. १२१

मायागतस्थौल्यबीजत्वं वा, परमेशाभूषणा-युध्धवेषचिह्नरोमतिल-चमत्कारसामर्थ्यप्रतापगुणक्रियाव्यापारसंसर्गशक्त्याद्यन्यतमात्मकचेतनत्वं वा चेश्वरात्मत्वमिति [१]।

अत्र आध्यात्मिकतत्त्वाख्यानग्रन्थकर्तुरभिप्रायोऽपि विशेषरुपेणेश्वर स्वरुपज्ञानायोपयुक्तो-तद्यथा -

**ईश्वरा अपि विद्यन्ते परमार्थत एव च ।**
**देवादिकचतुर्वर्गजीवेभ्योऽधिकभूतयः ॥**
**सर्जने पालने चैव संहृतावपि कर्मणि ।**
**नियुक्ता वासुदेवेन चाधिकारप्रदस्थिताः ॥**
**अधिकारनिवृतौ च मायामेतां विसृज्य ते ।**
**ध्यानसिद्धबलेनैव हरेर्धाम व्रजन्ति तु ॥**
**अन्येषु चैव कल्पेषु समानाकृतिकास्तथा ।**
**ईश्वराः प्रभवन्त्येव हरीच्छातोऽधिकारिणः ॥**
**'तमीश्वराणां परम' मिति श्रुत्या समीरितः ।**
**ईश्वराणां च परमः श्रीहरिस्तुः महेश्वरः [२]॥**

"जीवेभ्योऽधिकभूतयः" "वासुदेवेन चाधिकाराप्रदस्थिताः" "अन्येषु चैव कल्पेषु समानाकृतिकास्तथेश्वराः प्रभवन्त्येव हरीच्छातः" इत्यादिना ब्रह्माण्ड सर्जनपालनसंहारकार्यकर्तृणामेवेश्वरत्वं आध्यात्मिकतत्त्वाख्यानग्रंथकर्तुरभीष्टम्।

## ३.४ विदेहानां द्वैविध्यम्

प्रकृतिलयंगतानामीश्वराणां विदेहानामपि द्वैविध्यं भवति। स्थूलशरीरयुक्त सूक्ष्मशरीरयुक्तभेदात्। तत्र स्थूलशरीरयुक्ताः सन्ति जनकनृपतिः जडभरतः - नवयोगीश्वराः दत्तात्रेय इत्यादिकाः। ये च विदेहाः स्थूलं शरीरं विहाय प्रकृतिलयंगताः सूक्ष्मशरीरयुक्तास्ते द्वितीयकोटावाटीकन्ते। पण्डित श्रीकृष्णवल्लभाचार्यं विहाय कोऽपि दार्शनिकः विषयेऽस्मिन् नहि प्रकाशं चकार। मन्येऽत्र नहि सर्वेषां दार्शनिकानां सम्मतिः। तथापि श्रीस्वामिनारायण वेदान्त सार नाम्नि ग्रंथे चतुर्थ प्रकरणे "**ईश्वरनिरूपणावसरे** [३]" पण्डित श्रीकृष्णवल्लभाचार्यः विदेहानां द्वैविध्यमुक्तप्रकारेण प्रत्यपीपदत्।

---

१-तत्त्वप्रभावलि पृ. ११-१२
२-आध्यात्मिकतत्त्वाख्यानम् अ.२०/४९-५३
३- स्वा. वेदान्तसार पृ. १८-२१

# ३.५ ईश्वराणां देहत्रयनिरूपणम्

प्रकृतिलयं गतानां चेतनानां ईश्वरपदवाच्यानां त्रीणिशरीराणि भवन्ति। तानि च सन्ति स्थूलशरीरम्, सूक्ष्मशरीरम्, लिङ्गशरीरमथवा कारणशरीरञ्च।

स्थूलशरीरं तु पाञ्चभौतिकं भवति। यथा जनकनृपतेः जडभरतस्य नवयोगीश्वराणां शरीराणि। इमे सर्वे स्थूलशरीरसंपन्नाः सन्तिः। सत्यपि स्थूले शरीरे तेषां विदेहत्वमेव तस्माद् कारणाद्भवति यदेतेषां शरीरानुभवो न भवति। निरन्तरमात्मचिन्तन अभिरताः भवन्ति। तथा चाह जडभरतः सौवीरराजं प्रति।

**भूमौ पादयुगं त्वास्ते जङ्घपादद्वये स्थिते।**
**ऊर्वोजङ्घे द्वयेऽवस्थे तदाधारं तथोदरम्।**
**वक्षः स्थलं तथा बाहूस्कन्धौ चोदर संस्थितौ।**
**स्कन्धाश्रितेयं शिविका मम भारोऽत्र किंकृतः।**

लब्धज्ञानवादविदेहपुरुषाणां शरीरेष्वपि अभिमतिर्नहि भवति।

श्रीकृष्णवल्लभाचार्यस्तु ईश्वराणां चत्वारिशरीराण्यभिधते। स वर्णयति यथालोके-स्थूलसूक्ष्म-कारण महाकारणानि चत्वारि शरीराणि भवन्ति, तथैव ईश्वराणामपि विराट्-सूत्रात्मा-अव्याकृत-महाकारणाख्यानि चत्वारि शरीराणि भवन्ति। इति। किन्तु सत्सङ्गिजीवनम्-हरिवाक्यसुधासिन्धुः-भाषावचनामृतम्-श्रीहरिदिग्विजयः शिक्षापत्रीभाष्यमित्यादिषु ग्रंथेषु शरीरत्रयाणामेवाभिधानं वर्तते। तथापि संप्रदायैकदेशिभिः चत्वारि शरीराणी स्वीक्रियन्त एव।

अत्रेश्वराणां मुक्तिस्थानानां निरूपणं यद् श्रीकृष्णवल्लभाचार्येण कृतमस्ति तदवलोकयामः। येनेश्वरशरीराणां ज्ञानं सुलभं भवति। अयमेवाचार्य अग्रे वक्ति-तन्मध्यतो विराट्पुरुषः स्थूलशरीरम्। स एव **अत्यतिष्ठद् दशाङ्गुलम्**[१] इत्यादि वेदमन्त्रैरिदं दशाङ्गुलपरिमितं ब्रह्माण्डमावृत्यस्थितोऽस्तीति वर्ण्यते। तस्यालोकाकाशलोकोऽष्टमावरणतो दशगुणो विस्तृतः पञ्चपरार्द्धयोजनायामो वलयाकारेण दशदिक्षु व्याप्तो वर्तते। तदुपासकानां विराटस्वरूपप्राप्ति-रालोकाकाशश्चमोक्षस्थानमिति। तदिदं द्वितीयं मुक्तिश्रुति स्थानमिति। एतद्गताश्चेतनाः सर्वेऽपीश्वरा इत्युच्यन्ते -

तृतीयं मुक्तिस्थानं तुं कैलासलोको विद्यते। द्वितीयस्य मुक्तिस्थानस्य समन्तात् वलयाकारो महाविष्णोः सूत्रात्मात्मकं सूक्ष्मशरीरस्य कार्यात्मको निराकारचिन्मयाकाशः कैलासलोको विद्यते। अयमपि द्वितीयस्मात् मुक्तिस्थानात् दशगुणो विद्यते पञ्चाशत् परार्द्धयोजनायामः। अत्र दिव्यगुणशिवलिङ्गञ्च वर्तते। पञ्चमुखवत्या स्त्रिया सहाऽहंकारपुरुषो विराजते। अथ दिव्याऽऽकृति गायत्रीसहिता दिव्याः वेदपुरुषाश्चत्वारो विराजन्ते, तेऽनन्तशक्तिभिर्जुष्टास्तद्वन्दनां कुर्वन्ति। तस्योपसकानां तत् मुक्तिस्थानं तृतीयम्। तत्र गताश्चेतना ईश्वरा इत्युच्यन्ते।

तदुपरि महाविष्णो अव्याकृतात्मकस्य कारणशरीरस्य कार्यात्मकः

---

१-पुरुषसूक्तम् ऋग्वेदः १०/९०/०१

सत्त्वस्वभावाकाशो विष्णुलोको विद्यते। अत्र दिव्यस्वरूपसम्पन्नो लक्ष्मी विशिष्टः विष्णुः विराजते। तत्र सप्तचैतन्यानि सन्ति। लक्ष्मीप्रभृति सप्तशक्तयः सन्ति। विष्णोरुपासकानामिदं चतुर्थमुक्तिस्थानमास्ते।

तस्मादुपरिमहाविष्णोः महाकारणशरीरस्य कार्यरूप अमृतमयाकाशो महाविष्णोः लोको विद्यते। अयं पञ्चसहस्रपरार्द्ध योजनायाम :। अत्र महाविष्णुः अनन्तकोटि शक्तिसम्पन्नया महालक्ष्म्या सेवितः सन् विराजतेतराम्, तत्तदवतारोपासकानामिदं मुक्तिस्थानम्।

इमे सर्वे ईश्वराः मायायाः सत्त्वगुणमात्रेण संसृष्टाः परमसुखिनः सन्ति। महाविष्णुः मूलमायायाः उदरे संस्थितः मायायाः सो गर्भः हिरण्मयकोश उच्यते। हिरण्मयकोशे

**''हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।''**

इति श्रुतिरेव प्रमाणम्।

अनेन प्रकारेणाऽनेके हिरण्मयप्रकाशा उद्भवन्ति लीयन्ते च। अत एव ईश्वराणामपि संख्या अनन्ताः।

इत्थं ईश्वराणां स्थूल-सूक्ष्म कारणमहाकारणाख्यानि चतुर्विधानि शरीराणि साङ्गोपाङ्गं वर्णितानि।

किन्त्वयं विचारोऽस्ति पण्डितवरेण्यानां श्रीकृष्णवल्लभाचार्याणाम्। साम्प्रदायिका अन्ये विद्वांसस्तु देहत्रयमेवाभ्युपगच्छन्तीत्युक्तमेव। ते स्थूल - सूक्ष्मकारणशरीराण्येव स्वीकुर्वन्ति, ते महाकारणशरीरं नहि स्वीकुर्वन्ति। तेषां मतानुसारेण कारणशरीरमेव महाकारणशरीरमस्ति। नहि तत् तेभ्यो व्यतिरिच्यते। किन्तु सम्यक् ग्रंथ पर्यालोचनाज्ज्ञायते यद् भवत्येव महाकारणशरीरमपीति मे मति।

## जीवेश्वरयोर्देहत्रयनिरूपणम्

| | | सत्वप्रधान | रजसप्रधान | तमसप्रधान |
|---|---|---|---|---|
| **देहः** | जीवः | स्थूलम् | सूक्ष्मम् | कारणम् |
| | ईश्वरः | विराट | सूत्रात्मा | अव्याकृत |
| **अवस्था** | जीवः | जाग्रत | स्वप्न | सुषुप्तिः |
| | ईश्वरः | स्थितिः | उत्पत्ति | प्रलयः |
| **संज्ञा** | जीवः | विश्वाभिमानी | तैजसाभिमानि | प्राज्ञाभिमानी |
| | ईश्वरः | वैराज (वैश्वानर) | हिरण्यगर्भः | ईश्वरः |

## ३.६ ईश्वराणामन्वयव्यतिरेकत्वयोर्निरूपणम्

साधनसत्त्वे साध्यसत्त्वमिति ह्यन्वयस्य स्वरूपम्। साध्याभावे साधनाभाव इत्येव व्यतिरेकस्य स्वरूपम्। तत्र श्रीहरिवाक्यसुधासिन्धोः सप्तमे त्रयशीतितमयो तरङ्गयोः ईश्वरस्वरूपस्यान्वयव्यतिरेक्योर्वर्णनं समुपलभ्यते।

स्वामिनारायणदर्शने ईश्वरस्यान्वयिव्यतिरेकित्वमाश्रित्याधिकरणं वर्तते। तथा च सूत्रम् ''**जीवेशब्रह्म परब्रह्मणामन्वयिव्यतिरेकित्वमाह**[१] ''। इति।

अयमाशायो यतः ज्ञानघनाः जीवा ऐश्वर्यघनाः ईश्वराः प्रकाशघनं ब्रह्म आनन्दघनः परमात्मा, तमोघना माया, एतेषां स्वस्वोपादेयेऽपि अन्वयित्व मापूरकत्वेन तादात्म्येन चापि। व्यतिरेकित्वं तुं स्वरूपेण, कारणत्वेन तत्त्वेन च भवति। **अन्वयो व्यतिरेकश्च मायायां मायिकेष्वतः।**
**कीदृगस्ति तव स्वामिन्....** [२]इति।

शोभाराम कृतं प्रश्नं श्रुत्वा भगवान् श्रीहरिस्तमवादीत्

**मायातदीयकार्येषु हरेरर्धस्य नान्वय :।**
**अर्धस्यव्यतिरेकश्च भवतीत्यवगम्यताम्**[३]।

किंतु स्वरूपेण पृथगेव स्थितः प्रभुः वर्ततेऽन्वीयसर्वत्र ''**सामर्थ्यं तस्य हीदृशम्** ''।

**नास्य प्रवेशे मायायामशुद्धत्वभयं क्वचित्।**
**यतस्तस्य प्रवेशेन सापि यात्यक्षरात्मताम्॥**
**अपि तत्कार्यतत्त्वानि तस्यचानुप्रवशेतः।**
**ब्रह्मतां यान्त्यतो नेशः तत्सम्बन्धे दुष्यति॥**
**धाम्ना स्वेनैव स सदा निरस्तकुहकोऽस्ति हि।**
**इति श्रीमद्भागवते बहुधास्ति निरूपितम्॥**
**वृक्षस्य बीज आकाशो योऽन्वितोऽस्ति स एव हि।**
**तच्छाखा पत्रपुष्पादावन्वितो भवति ध्रुवम्॥**
**तथाऽप्यसौ न वृक्षस्य छेदे दाहे च कदाचित्।**
**भिद्यते दहते वापि यद् तद्रूपं हि तादृशम्॥**
**एवं तत्कार्यमायायामन्वीयाऽपि हरिस्ततः।**
**पृथगेव स्वरूपेण वर्तते सर्वदाऽच्युतः**[४] ॥ इति

अस्य सम्पूर्णस्य कथनस्यायमाशयो विद्यते यद् यतो हि- ईश्वरः सर्वेषु मायाकार्येष्वन्तयार्मित्वेन प्रविष्टो विद्यतेऽत एव तस्यान्वयित्वम्। किञ्च- तथा भूतोऽपि सन्, ईश्वरः तेभ्यः सर्वेभ्यः पृथगस्तीति तस्य व्यतिरेकत्वं सिद्धयति। तथा च सूत्रम्

---

१-स्वा. दर्शनसूत्रम् ८९/१६९
२-हरिवाक्य सुधासिन्धुः २०७/१०
३-हरिवाक्य सुधासिन्धुः २०७/४
४-हरिवाक्य सुधासिन्धुः २०७/१३-१८

**पृथक् वर्तमानत्वेन व्यतिरेकत्वम्**[१]। इति।

**सर्वत्र विशेषशक्तिप्रवेशेनान्वयित्वात्**[२]। इति।

अन्वय व्यतिरेक्योः स्वरूपञ्चाह श्रीहरिवाक्यसुधासिन्धुः ब्रह्मरसायनभाष्यकारः

**''अन्वयः अनु अनु अयः प्रापणं येन केनापि संसर्गेण तदन्तर्वृत्तित्वम्।' व्यतिरेकत्वम्-येन केनापि संबन्धेन विशेषेणातिशयतया रिच्यते तद् विधस्य तद्विधत्वम् पृथक्स्थितिरिति**[३]।'' अयं भावः-

## ३.७ ईश्वरपरयोर्भेद :

यद्यपि तेषु तेषु दर्शनेष्वीश्वरपरयोरैक्यमेव स्वीक्रियते किन्तु स्वामिनारायणदर्शनानुसारेण तयोः भेदः स्वीक्रियते। श्री स्वामिनारायणदर्शने स्वीकृतेषु पञ्चसु तत्त्वेषु द्वितीयं तत्त्वमीश्वरो वर्तते। सृष्टिमीमांसायाः मुक्तेरवधारणाया अवतारवादस्य च वर्णने श्रीस्वामिनारायणदर्शनस्य ईश्वरनिरूपणं विशेषतयाऽनुकूल्यं बिभर्ति।

**''ईश्वरः जीवतत्त्वापेक्षया श्रेष्ठोऽविद्यावेष्टितः''**

श्रीहरिवाक्यसुधासिन्धुः 'तरङ्ग श्लोक संख्या १०स्य भाष्यरसायनम्।

**''परंब्रह्मब्रह्माभ्यां न्यूनः ब्रह्माण्डस्य सृष्टिस्थितिब्रह्मणां कार्येषु परस्य ब्रह्मणः सहायको विद्यते।**[४]''

श्री स्वामिनारायणदर्शनानुसारेणेश्वरा अनेके सन्ति; किन्तु परंब्रह्म परमात्मा त्वेक एव। ब्रह्माण्डस्य सृष्टिस्थितिसंहारकर्तृणां ब्रह्मविष्णुमहेश्वरेभ्य आरभ्यः प्रधानपुरुषपर्यन्तं समे ईश्वरा एव कथ्यन्ते।

श्रीहरिवाक्यसुधासिन्धो : नैकेषु तरङ्गेषु भगवान् श्रीहरि ईश्वरपरयोर्भेदान् प्रत्यपीदत। तथापि हरिवाक्यसुधासिन्धोः एकोनचत्वारिंशत्तमे तरङ्गे.उक्तमास्ते।

**ततः सत्याः वस्तुतो वै जीवेशनिगमादयः।**

**मुमुक्षुभिरिति ज्ञात्वा भजनीयः सदा हरिः**[५]।

अत्रः श्लोके जीवेश्वराभ्यां भिन्नतया प्रोक्तः श्रीहरिः परंब्रह्म परमात्मा। किञ्च **''तद्देवा ज्योतिषांज्योतिरायुर्होपासतेऽमृतम्**[६]''। इत्यस्मिन् वाक्ये मन्ये तच्छब्देन परामृष्टस्य परस्य ब्रह्मण उपास्यत्वं, देवादीनामीश्वराणां, परस्य देवस्य उपासकत्वमभिहितम्। अत एवेश्वरपरयोर्भेदस्य सिद्धिर्भवति। ''किञ्चैतदुपर्यपिबादरायणः'' इति शारीरकसूत्रे अयं विचारः शङ्कापूर्वकं

---

१-स्वा. दर्शन सूत्रम्
२-स्वा. दर्शन सूत्रम्
३-ब्रह्मरसायन भाष्यम् खण्ड -१
४-ब्रह्मरसायन भाष्यम् खण्ड -१
५-हरिवाक्यसुधासिन्धुः ३९/१९
६- बृहदारण्यकोपनिषत् ४/४/१६

कृतो वर्तते, अत्र ब्रह्मोपासनायां मनुष्यव्यतिरिक्तानां देवानामधिकारो वर्तते न वा तदनन्तरं निर्णयरूपेणाभिहितमास्ते "**भावो हि बादरायणः**[१]" इति सूत्रेऽभिहितं यद् मनुष्यवद्देवानामीश्वराणामपि परमात्मोपासनेऽधिकारो वर्तत एव।

अनेनापि देवादिकानामीश्वराणां च परमात्मनोर्भेदः सिद्धः, अत एव परेशयोर्भेदः स्वाभाविकः सिद्धो भवति।

भाषावचनामृतस्य दुर्गपुरप्रथमप्रकरणे पञ्चचत्त्वारिंशत्तमे वचनामृते परंब्रह्मपरमात्मा जीवेश्वरेभ्यस्तेषां कर्मानुसारेण फलं प्रददातीत्युक्तं तेनाऽपि परेश्वरयोर्भेदस्तु सिद्धो भवति। प्रमाणमत्र "**अक्षरात् परतः परः परंब्रह्म**[२]" इति श्रुतिः।

यस्मात् कारणात् परंब्रह्म ईश्वरानपि व्याप्नोत्यन्तर्यामिरूपेण तस्मादपि कारणादीश्वरपरयोर्व्याप्यव्यापकरूपो भेदो भवति सिद्धः। परंब्रह्मप्रेरित एव ब्रह्मविष्णुशिवादिकाः सृष्टिस्थित्यादिकार्ये परस्य ब्रह्मणः सहायका भवन्ति संहारसृष्ट्यादिकार्याणि च कुर्वन्ति। अत एवापि परेशयोर्भेदो सिद्धिः।

भगवान् श्रीहरिरपि निम्नांकितैः श्लोकै ईश्वरपरयोर्भेदमाह–

**असंख्याता यथा सन्ति जीवात्मानस्तथैव हि।**
**ब्रह्माण्डानि हि तद् देहाः तेषां संख्या न विद्यते॥**
**ततस्तज्जीववैराजपुंसामपि न सा मता।**
**अन्तर्यामी तु सर्वेषां कृष्णात्मा पुरुषोऽस्ति यः॥**
**सत्येक एव भगवान् वेदे ब्रह्मेति कीर्तितः[३]।**

अत्रायं संग्रहश्लोकः।

**व्यापकत्वान्नियामकत्वादेकत्वात्कारणादपि।**
**सर्वमूलाच्च प्राप्यत्वाद्भगवानीशविलक्षणः।**
**सर्वासु मोक्षविद्यास्वात्मत्वेनोपवर्णितः।**
**भगवान् श्रीहरिर्नित्यं लोके विजयतेतराम्।**

इत्थं श्रौतस्मार्तवचोभिः प्रमाणानुकूलतर्कैश्च कृते विचारे नूनं सिद्ध्यति परंब्रह्मेशयोः भेदः।

---

१-ब्रह्मसूत्रम् १/३/३२
२-मुण्डकोपनिषत् २/१/४
३-हरिवाक्यसुधासिन्धुः १६४/३६/३८

## ३.८ ईश्वराणां भेदाः

प्राक्तनेषु प्रकरणेषु मया प्रतिपादितं यद् हिरण्यकोशस्य गर्भे विद्यमानं महाविष्णुमारभ्य प्रधानपर्यन्तं वैराजादिकाः ये केचनापि देवा अधिष्ठातृरूपेण सन्ति ते सर्व ईश्वरपदाभिलप्याः सन्ति। किञ्च परस्य ब्रह्मणः श्रीहरेः शरीरभूतानि ब्रह्माण्डान्यनन्तानि सन्ति। तेषु सर्वेषु ब्रह्माण्डेष्विमे सर्वे ईश्वराः सन्तिः। अत एव ईश्वराणामानन्त्यमनेकत्वं च स्वत एव सिद्धम्।

ईश्वरस्य स्वरूपयाथात्म्यज्ञानाय सृष्ट्यादि प्रक्रियावश्यमेव ज्ञातव्या भवति। वचनामृते बहुषु यदा सृष्टिवर्णनं अवसरप्राप्तं भवति तदा भगवान् आनुषङ्गिकरूपेणे तत्त्वस्यास्यापि चर्चां करोत्येव।

ईश्वराणां याथात्म्य बोधाय सृष्टिसर्जनात्मिकां प्रक्रियामधिकृत्य श्रीकृष्णवल्लभाचार्येण स्वकीये योगदर्शनस्य भाष्यस्य

**भुवनज्ञानं सूर्ये संयमात्** [1]। इति सूत्रस्य भाष्ये
**आवरणज्ञानं च तत्र तत्र संयमात्।**
**ईश्वरलोकज्ञानं विराट्संयमात्।**
**कैलासज्ञानं शिवलिङ्गज्योतिः संयमात्।**
**सत्त्वस्वभावाकाशज्ञानं विष्णुसंयमात्।**
**अवतारधामज्ञानं महाविष्णुसंयमात्।**
**हिरण्यमयकोषस्य ज्ञानं तत्र संयमात्** [2]।

इत्याभ्यां वार्तिकाभ्यां तत्स्थाननिर्णयादिकं प्रत्यपीपददीश्वरतत्त्वम्। वस्तुतस्तु वचनामृतोक्तसृष्टिसर्जनात्मिका प्रक्रिया द्वारा सृष्टिसु ब्रह्माण्डस्य रचयितु ईश्वरत्वं प्रतीयते।

तद्यथा -

**श्रीकृष्णो भगवानादावक्षराख्यपुमात्मना।**
**मायायामीक्षणेनैव स्वेच्छया गर्भमादधौ।**
**ततः प्रधानपुरुषकोट्यस्वाभवन्मुने।**
**ब्रह्माण्डकोट्यस्तेभ्यो भवन्ति स्मेश्वरेच्छया॥**
**तत्रैकतमब्रह्माण्डसंभवः कथ्यते मया।**
**तेनानुमेयः सर्वेषामण्डानामपि सम्भवः॥**
**कृष्णः पुरुषरूपेण प्रधाने गर्भमीक्षणम्।**
**दधाराऽथ महत्तत्त्वं चितात्मकमभूत्तत :॥**

---

१-योगसूत्रम् ३/२६

२-तत्रैव श्रीकृष्णवल्लभाचार्य कृत भाष्ये

**तस्मादभूदहंकारस्त्रिगुणस्तत्र सात्त्विकात् ।**
**मन इन्द्रियदेवाश्च राजसादिन्द्रपांसवः ॥**
**तामसाच्छब्दतन्मात्रा द्वाराकाशमजायत ।**
**ततः स्पर्शस्ततो वायुस्ततो रूपं ततोऽनलः ।**
**ततो रसस्ततश्चापस्ततो गन्धस्ततश्च भूः ।**
**भिन्न भिन्न स्वभावानि तत्त्वान्येतानि देवताः ।**
**अन्तर्यामितया कृष्णाविष्टान्येतानि सर्वशः ।**
**संवृत्य जीवेशतनूः स्वस्वांशैः ससृजुस्ततः ॥**
**विराट्सूत्राव्यकृताख्यं देहत्रितयमीशितुः ।**
**जीवे देहत्रयं स्थूलसूक्ष्मकारणसंज्ञितम् ।**
**विराट्देही तु वैराजः सात्त्विकः सर्वपालकः ।**
**हिरण्यगर्भः सूत्रांगो जगत्सृष्टा च राजसः ॥**
**तामसोऽव्याकृतात्मेशः सर्वसंहारकारकः**[१] **।**

इत्यादिषूक्तम् ।

**अत्र ब्रह्मरसायनाख्यं भाष्यम्**[२]

"तर्हि कोऽयं प्रधानपुरुषः ? इति चेत्, ईश्वरकोटिगो मुख्येश्वरो महत्तत्त्वोद्भावकैश्वर्यधनात्मकश्चेतनात्मा, यदारभ्याधः सृष्टिषु ब्रह्मविष्णुमहेश पर्यन्ता ईश्वराः सम्मताः '**प्रधानपुरुषेश्वराः**' प्रधानपुरुषोः नाम महेश्वरः । ईश्वरकोट्यन्तर्गतानां समेषां मुख्यत्वादयं महेश्वरः"। ईश्वराणामीश्वरत्वेऽपि मायावश्यत्त्वाद सगुणब्रह्मेति स्वयं भगवता श्री स्वामिनारायणेनोक्तम् । श्री शतानंदमुनिरप्याह सत्सङ्गिजीवनग्रन्थे-

"**सगुणब्रह्मसंज्ञोऽसौ सिसृक्षुः पुरुषो जगत्**[३]"।

इति श्लोकार्धेन प्रधानपुरुषं सगुणब्रह्मशब्देन व्यनक्ति । स एवाग्रे अव्याकृतशरीरात्मत्वेन

"**तदात्मा पुरुषो यश्च स ईश्वर ईतीर्यते**[४]"।

ईश्वरशब्दाभिव्यक्तः । प्रधानपुरुषरूप ईश्वरः "**गुणानां सत्त्वरजस्तमसां क्षोभकत्वाद, सगुणब्रह्मसंज्ञयोच्येत**[५]" इति तत्रैव भावप्रबोधिन्यां श्रीविहारीलालाचार्यः । **गुणक्षोभहेतुभूतां कालशक्तिं, महत्तत्त्वजननहेतुभूतां कर्मशक्तिम्, परिणामहेतुभूतां स्वभावशक्तिञ्चाप्नोति परानुकम्पया प्रधानपतिः**[६]।

---

१-हरिवाक्यसुधासिन्धुः १२/२७-३७
२-ब्रह्मरसायण भाष्यम्
३-सत्संङ्गिजीवनम् ४/६८/२४
४-सत्संङ्गिजीवनम् ४/६८/२९
५-तत्रैव भावप्रबोधिनीटीकायां श्री विहारीलालाचार्यः
६-तत्रैव हेतुटीकायां श्रीशुकानंदमुनिः

इति वैराजपुरुषस्य विराट्सूत्रात्मा व्याकृताख्यानि त्रीणि शरीराण्यपि भवन्ति।

**विराट्**- ईश्वरस्य विराट् नामकस्य शरीरस्य जीवात्मनः स्थूलशरीरेण साम्ये वर्तते यथा पाञ्चभौतिकमिदं शरीरं स्थूल शरीरमिति कथ्यते, तथैव चतुर्विंशतितत्त्वात्मक ब्रह्माण्डरूपं शरीरं "विराट्" इतीर्यते । तस्य करचरणादियुक्तत्वेऽपि अति स्थौल्यादगोचरता । प्राह च भगवान् श्रीहरिः श्रीहरिवाक्यसुधासिन्धौ-

**वैराजस्य विराटसंज्ञं रूपं चाति महत्त्वतः ।**
**यथादृग्गोचरो नास्ति.......**[1]
**नाभ्यब्जनालमूलस्याऽनुपलम्भात्तु वेधसः ।**
**महत्ता विश्वरूपस्य प्रसिद्धा लोकवेदयो :**[2]॥

पञ्चभूतपञ्चतन्मात्रपञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि चतुरन्तः करणाभिधैः चतुर्विंशतिः तत्त्वैः यन्निर्मितं शरीरं तद्वैराजपुरुषस्य "विराट्" नामकं शरीरमस्ति। तस्य च शरीरस्य द्विपरार्धकालपर्यन्मायुष्यमिति वचनामृतवचनम्[3]। देह देहिनोरैक्यत्वाच्छास्त्रेषु क्वचिद्विराडिति क्वचिच्च वैराज इति शब्देनास्यैव वर्णनम् समुपलभ्यते। यथात्मा पार्थिववपु आसाद्य जीव इति शब्द्यते तथैव प्रधानपुरुषः विराट् शरीरमासाद्य वैराज इति शब्द्यते ।

**सूत्रात्मा** - जीवात्मनो यथा सूक्ष्मशरीरं भवति तथेश्वरस्य सूत्रात्मा नाम द्वितीयं शरीरं भवति। महत्तत्त्वात्मकमिश्वरस्येदं शरीरमिति हि शतानंदमुनिः प्राह सत्सङ्गिजीवनग्रन्थे। तथा च

**उद्बुद्ध शुद्धसत्त्वादित्रिगुणा प्रकृतिस्तु सा ।**
**तदा सत्त्वगुणद्वारा महत्तत्त्वं प्रसूयते ।**
**ज्ञानक्रियाभ्यां शक्तिभ्यां चितं सूत्रं च यद्विदु :**[4]॥ इति ।

महत्तत्त्वत्रिगुणाहंकारं स्वरूपमीश्वररस्य सूत्रात्मा नामकं द्वितीयं वपुः । तथाचोक्तं सत्संङ्गिजीवने

**त्रिगुणोऽसावहंकारस्तत्त्वेन महता सह ।**
**सूत्राभिधानं ईशस्य द्वितीयं वपुरुच्यते**[5]॥ इति ।

महामुनिः शतानंदः अव्याकृतशरीरं निम्नांकितप्रकारेण सत्सङ्गिजीवने वर्णयति

**शुद्धं गुणत्रयं ह्येतत्प्रोच्यतेऽव्याकृताभिधम् ।**
**अव्यूढकरपादादि वपुरीशस्य चादिमम्**[6]॥ इति ।

---

१-हरिवाक्यसुधासिन्धुः ६३/४५
२-हरिवाक्यसुधासिन्धुः ६३/४१
३-वचनामृतम् ग.प्र.प्र. १२
४-सत्संङ्गिजीवनम् ४/६८/३१
५-सत्संङ्गिजीवनम् ४/६८/३६
६-सत्संङ्गिजीवनम् ४/६८/२८

जगत्सिसृक्षया परब्रह्म "**स ऐक्षत्** " इति श्रुत्यनुसारेण ईक्षणं विधाय "**एकोऽहं बहुस्यामि** 'ति संकल्पयति। तत्संकल्पादनन्तरोद्भूतसंकल्पबलेनान्तः प्रेरितोऽक्षरमुक्तः मायया संयुनक्ति महापुरुषमहामायासंसर्गाद्धि प्रधानपुरुषोद्भवः। स एव सगुणब्रह्म जगत्सिसृक्षया त्रिगुणात्मिकां मायां क्षुभ्नाति । ततस्तत्र पुरुषाधिष्ठितेन स्वभावेन त्रिगुणानामवस्थान्तराप्तिर्भवति । ततः महत्तत्त्वस्य जननरूपा क्रिया भवति । एतदव्यक्तकरपादादिशुद्धमादिमीश्वरस्याव्याकृतं वपुरिति।

सम्प्रदायनयानुसारं प्रधानपुरुषाणां, ब्रह्माण्डनायक महाविष्णु-हिरण्यगर्भवैराज-ब्रह्मा-विष्णु-महेश-संकर्षणानिरुद्ध-प्रद्युम्नादिनामिश्वरत्वमेव। ततोऽपि तत्तन्महत्तत्त्वादीश्वरात्मनामपीश्वरत्वमेव। कार्यभेदाद्भेद इत्यपि सत्यमेव। ऐश्वर्यभेदादभेद इत्यपि सत्यम्। अभेद वचने किं चतुर्मुखस्य प्रधानपुरुषस्य वा साधर्म्यमावोढुं शक्यते ?

इत्थमीश्वराणां भेदनिरूपणम्।

## ३.९ इन्द्रियान्तःकरणदेवतानामीश्वरत्वसमर्थनम्।

श्रीमत्सत्संगिजीवनानुसारेण वैराजपुरुषस्योत्पत्तिर्भवति क्रमादव्याकृत सूत्रात्माविराडिति अवस्थात्रये। प्रधानपुरुषस्य पुत्ररूपेणोत्पद्यमानस्यास्य पुरुषस्य प्रथमावस्था-द्वितीयावस्था-तृतीयावस्था च पूर्वप्रकरणे मयोक्ताः । समासेन ब्रह्माण्डस्याव्याकृतावस्था प्रधानरूपेण विद्यमानायाः गुणसाम्यं मायाया-ऽसंक्षोभणान्महत्तत्त्वस्योत्त्पत्तिर्जायते तत् सूत्रात्मेति कथ्यते । तृतीयावस्थायां तावत् त्रिविधाहंकारेषु सात्त्विकान्मनसः इन्द्रियान्तकरण देवतानाञ्चोत्पत्तिर्भवति। राजसाहंकराद् बुद्धि पञ्च कर्मेन्द्रियाणिपञ्चज्ञानेन्द्रियाणि पञ्च प्राणानामुत्पत्तिर्भवति।

अत्रेन्द्रियान्तःकरणादीनां अधिष्ठातृणां देवतानां चेतनत्वं ईश्वरत्त्वमिति च। प्रधानपुरुषादधो उत्पद्यमानानामेतेषां तस्मान् न्यूनत्वमपि भवति।

श्रीहरिवाक्यसुधासिन्धो :- ४५- ६५- ९७ तरंगेषु देवतानां वर्णनं कृतं वर्तते। तथाहि-

**जलं यथा निःप्रतीकं सांगोऽस्ति वरुणोऽमरः ।**
**यथा ज्वाला निःप्रतीका सांगोऽस्त्यग्निश्च देवता** [१]॥

इत्यादीनां देवतानां वर्णनं कृतम् ।

---

१-हरिवाक्यसुधासिन्धुः ४५/१६

**अंतमाप्नोति जिह्वा यदा योगी तदा स तु ।**
**प्राप्नोति वरुणं देवं वैराजरसनात्मकम् ॥**
**एवं वाचो यदा सोऽन्तं याति तर्ह्यग्निदेवताम् ।**
**त्वचोऽन्तं च यदा तर्हि वायुमाप्नोति देवताम् [१]।**

इत्यादिन ६५ तरंगे वर्णनंकृतं देवतानां तासाम् ।

**बाह्यान्त : करणान्येव तदीयान्विषयांस्तथा ।**
**तद्व्यक्तिकर्तृदेवांश्च युगपद्वेत्ति बुद्धिगः [२]॥**

इति ९७ तरंगे इन्द्रियान्तःकरणानां देवतानां वर्णनं कृतम् । तत्त्वाभिमानीनां देवतानां निम्नलिखित प्रकारेण ज्ञानं भवितुमर्हति

तत्त्वानि - अधिष्ठात्र्योदेवताः

१. मनः - चन्द्रमा
२. बुद्धिः - ब्रह्मा
३. चित्तम् - वासुदेवः
४. अहंकारः - रुद्रः
५. चक्षुः- सूर्यः
६. श्रोत्रम्ः- दिक्
७. घ्राणम्- अश्विनीकुमार
८. रसना - वरुणः
९. त्वक् - वायुः
१०. वाक् - अग्निः
११. पाणिः - इन्द्रः
१२. पादः- विष्णुः
१३.पायुः- मित्रः
१४. उपस्थः- प्रजापतिः
१५. पृथिवी- पृथिवी
१६. आकाश - आकाशः

एतेषां समेषामुत्पत्तिक्रम उपनिषत्सु समुप्रलभ्यते । छांदोग्योपनिषदि तावत् । पञ्चमहाशालामश्वपतिना साकं वार्तालापेन ज्ञायते ''द्यो-सूतेजा'' इत्यादिनेन्द्रियाधिष्ठातृणामेव वर्णनम् ।

---

१- हरिवाक्यसुधासिन्धुः ६५/१०-११
२-हरिवाक्यसुधासिन्धुः ९७/९

सत्संङ्गिजीवनेऽप्यभिहितम्

**देवता इन्द्रियाणां च जाता वैकारिकाद्दश ।**
**दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥ ४**
**विषयाणामिन्द्रियाणां विभागेनाभिव्यञ्जनम् ।**
**कुर्वन्ति देवता नूनं दिगाद्याश्च पृथक् पृथक् । ५**
**दशेन्द्रियाणि बुद्धि ब्रह्मा प्राणश्च तैजसात् ।**
**कालादिभिरहङ्कारादुत्पद्यन्ते विकुर्वतः** [१]॥ ६ इति ॥

इत्यत्रेन्द्रियाणामधिपतीनां देवतानां वर्णनं श्रीशतानंदमुनिः करोति । एते च सर्वे ईश्वराः सन्तीति शतानन्दमुनेरभिप्रायः ।
अत्र दशानामेव देवतानां वर्णनमुपलभ्यते ।

## ३.१० ईश्वरविषयकं, पण्डित श्रीकृष्णवल्लभाचार्याणां मतम् ।

पण्डितश्रीकृष्णवल्लभाचार्याः श्री स्वामिनारायणदर्शनाभिमतस्य ईश्वर तत्त्वस्य निर्णयमकार्षुः । तैरभिहितं यत् भगवता श्रीस्वामिनारायणेन ईश्वरतत्त्वस्य यत्र प्रतिपादनं कृतं दर्शनान्तरेभ्यः भिन्नमपि समुचितमाभाति । भगवता प्रतिपादितं यत् सृष्टेः प्रवाहोऽयमनादि अत एव ये केचनापि ब्रह्माण्डेष्वीश्वराः सन्ति ते सर्वे अनादयः । इमे सर्वे सगुणाः ऐश्वर्यशालिनश्च सन्ति । "**प्रधानपुरुषेश्वराः**" इति वचनमपीश्वराणामनादित्वं सूचयति । सर्गस्यान्त इमे समे महामायायां लीयन्ते । सर्गारम्भे सञ्जाते च पुनः पुनः स्वामित्वं भजन्ते ।

प्रवाहगतानां ब्रह्माण्डानामनादित्वादेव तेषां रक्षकाः संहारकाश्चेमे ईश्वराः अनादय एव । इति ब्रह्मरसायनभाष्ये प्रतिपादयामास श्रीकृष्णवल्लभाचार्यः । प्रकृतिलयंगता जीवा यद्यप्यनादय ईश्वरास्तथापि 'दशमन्वन्तराणि' इत्यादिना तेषां सान्तमुक्तिरपि प्रतिपादिता । अत्रेदं बोध्यम् सान्तमुक्तिप्राप्तानामीश्वरत्वं यदभिहितं तत्त्वौपचारिकमेव, वस्ततस्तु सृष्टिसञ्चालकानामेवेश्वरत्वं दर्शनेऽस्मिन् स्वीक्रियते ।

## ३.११ उपसंहारः

श्रीस्वामिनारायणसंप्रदायाभिततत्त्वानां कृते स ति निपुणे निर्भालने, आभाति यत् स्वामिनारायणसम्प्रदायाभिमतानां ईश्वराणां ब्रह्माणां चान्तर्भावः रामानुजीयानां जीवतत्त्वे सुकरम् । किन्तु योऽयमीश्वराणानां विभेदः कृतो वर्तते सोऽतीववैज्ञानिकतां बिभर्ति । ईश्वराणां यो हि विभागो वर्तते तस्यान्तर्भावो न तु

---

१- सत्संङ्गिजीवनम् ४/६९/४-६

रामानुजीयानां मुक्तेषु शक्यते, न वा नित्येषु जीवेषु। ऐषामन्तर्भावे हि बद्धजीवेष्वेव भवितुमर्हति। तथाकृते सति सामान्यजीवापेक्षया ऐतेषां यद्धि नियामकत्वरूपं वैशिष्ट्यं विद्यते तदेवापहीयते। एतस्मादेव कारणादेतेषामधिष्ठातृत्वमादाय ईश्वरत्वमुद्घोषितं भगवता श्रीहरिणा॥ इति शम्॥